শ্রীঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

শ্রীমান্ ৱেঙ্কটনাথার্যঃ কৱিতার্কিককেসরী।
ৱেদান্তাচার্যৱর্যো মে সন্নিধত্তাং সদা হৃদি॥

শ্রী মেল্পপত্তূর্ নারাযণভট্টতিরি ৱিরচিতম্

# ॥শ্রীমন্নারাযণীযম্ ॥

## দশক - ৮

*This document* has been prepared by*

***Sunder Kidambi***

*with the blessings of*

শ্রী রঙ্গরামানুজ মহাদেশিকন্

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

*This was typeset using Bengali for TEX.

শ্রীঃ
শ্রীমতে কৃষ্ণায পরব্রহ্মণে নমঃ
শ্রীমতে রামানুজায নমঃ

# ॥শ্রীমন্নারাযণীযম্ ॥

## দশক - ৮

*প্রলযৱর্ণনং জগতসৃষ্টিপ্রকারৱর্ণনং চ*

এৱং তাৱত্ প্রাকৃতপ্রক্ষযান্তে
ব্রাহ্মে কল্পে হ্যাদিমে লব্ধজন্মা।
ব্রহ্মা ভূযস্তৱত্ত এৱাপ্য ৱেদান
সৃষ্টিং চক্রে পূর্ৱকল্পোপমানাম্॥ ১ ॥

সোযং চতুর্যুগসহস্রমিতান্যহানি
তাৱন্মিতাশ্চ রজনীর্বহুশো নিনায।
নিদ্রাত্যসৌ ত্বযি নিলীয সমং স্বসৃষ্টৈ-
র্নৈমিত্তিকপ্রলযমাহুরতোস্য রাত্রিম্॥ ২ ॥

অস্মাদৃশাং পুনরহর্মুখকৃত্যতুল্যাং
সৃষ্টিং করোত্যনুদিনং স ভৱতপ্রসাদাত্।
প্রাগ্ব্রাহ্মকল্পজনুষাং চ পরাযুষাং তু
সুপ্তপ্রবোধনসমাস্তি তদাপি সৃষ্টিঃ॥ ৩ ॥

পঞ্চাশদব্দমধুনা স্বৱযোর্ধরূপ-
মেকং পরার্ধমতিৱৃত্য হি ৱর্ততেসৌ।
তত্রান্ত্যরাত্রিজনিতান্ কথযামি ভূমন
পশ্চাদ্দিনাৱতরণে চ ভৱদ্বিলাসান্॥ ৪ ॥

দিনাৱসানেথ সরোজযোনিঃ
সুষুপ্তিকামস্তৱযি সন্নিলিল্যে।
জগন্তি চ ত্বজ্জঠরং সমীযু-
স্তদেদমেকার্ণৱমাস ৱিশ্বম্॥ ৫ ॥

www.prapatti.com

তৱৈৱ ৱেষে ফণিৰাজি শেষে
জলৈকশেষে ভুৱনে স্ম শেষে।
আনন্দসান্দ্ৰানুভৱস্বৰূপঃ
স্বযোগনিদ্ৰাপৰিমুদ্ৰিতাত্মা॥ ৬ ॥

কালাখ্যশক্তিং প্ৰলযাৱসানে
প্ৰবোধযেত্যাদিশতা কিলাদৌ।
ত্বযা প্ৰসুপ্তং পৰিসুপ্তশক্তি-
ৱ্ৰজেন তত্ৰাখিলজীৱধাম্না॥ ৭ ॥

চতুৰ্যুগাণাং চ সহস্ৰমেৱং
ত্বযি প্ৰসুপ্তে পুনৰদ্বিতীযে।
কালাখ্যশক্তিঃ প্ৰথমপ্ৰবুদ্ধা
প্ৰাবোধযত্ত্বাং কিল ৱিশ্বনাথ॥ ৮ ॥

ৱিবুধ্য চ ত্বং জলগৰ্ভশাযিন
ৱিলোক্য লোকানখিলান্ প্ৰলীনান্।
তেষ্বেৱ সূক্ষ্মাত্মতযা নিজান্তঃ-
স্থিতেষু ৱিশ্বেষু দদাথ দৃষ্টিম্॥ ৯ ॥

ততস্তৱদীযাদযি নাভিৰন্ধ্ৰা-
দুদঞ্চিতং কিঞ্চন দিৱ্যপদ্মম্।
নিলীননিশেশেষপদাৰ্থমালা-
সঙ্ক্ষেপৰূপং মুকুলাযমানম্॥ ১০ ॥

তদেতদম্ভোৰুহকুডমলং তে
কলেবৰাত তোযপথে প্ৰৰূঢম্।
বহিৰ্নিৰীতং পৰিতঃ স্ফুৰদ্ভিঃ
স্বধামভিৰ্ধ্ৱান্তমলং ন্যকৃন্তত্॥ ১১ ॥

সম্ফুল্লপত্ৰে নিতৰাং ৱিচিত্ৰে
তস্মিন্ ভৱদ্বীৰ্যধৃতে সৰোজে।
স পদ্মজন্মা ৱিধিৰাৱিৰাসীত
স্বযম্প্ৰবুদ্ধাখিলৱেদৰাশিঃ॥ ১২ ॥



www.prapatti.com

অস্মিন্ পরাত্মন্ ননু পাদ্মকল্পে
ত্বমিত্থমুত্থাপিতপদ্মযোনিঃ।
অনন্তভূমা মম রোগরাশিং
নিরুন্ধি ৱাতালযৱাস ৱিষ্ণো॥ ১৩ ॥

**********

www.prapatti.com